रणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितोगुहायाम्। तेजोमयं पश्यति वीतशोकोधातुः प्रसादान्महिमानमात्मनः। वासुदेवस्तमोऽन्धानां प्रत्यक्षोनैव जायते। अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभिः। एष वै पुरुषोविष्णुर्व्यक्ताव्यक्तः सनातनः। एष धाता विधाता च पुराणोनिष्कलः शिवः। वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। मन्त्रैर्विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय। पृथिव्यापस्तथा तेजोवायुराकाशमेव च। पञ्चैमानि विजानीयान्महाभूतानि पण्डितः। चक्षुः श्रोत्रं स्पर्शनञ्च रसना घ्राणमेवच। बुद्धीन्द्रियाणि जानीयात् पञ्चैमानि शरीरके। शब्दोरूपं तथा स्पर्शो रसोगन्धस्तथैव च। इन्द्रियस्थान् विजानीयात् पञ्चैव विषयान् बुधः। हस्तौ पादावुपस्थञ्च मुखं पायुस्तथैव च। कर्म्मेन्द्रियाणि पञ्चैव नित्यं सन्ति शरीरके। मनोबुद्धिस्तथैवात्मा व्यक्ताव्यक्तं तथैव च। इन्द्रियेभ्यः पराणीह चत्वारि प्रवराणि च। तथात्मानं तदग्रतीतं पुरुषं पञ्चविंशकम्। तन्तु ज्ञात्वा विमुच्यन्ते ये जनाः साधुवृत्तयः। इदन्तु परमं शुद्धमेतदक्षरमुत्तमम्। अशब्दमरसस्पर्शमरूपं गन्धवर्ज्जितम्। निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम्। विज्ञानसारथिर्यस्तु मनःप्रग्रहबन्धनः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्। आराग्रशतशोभागः कल्पितस्तु सहस्रधा। तस्यापि शतशोभागाज्जीवः सूक्ष्मउदाहृतः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः। एष सर्व्वेषु भूतेषु तिष्ठत्यविरलः सदा। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः"। जीवात्मपरमात्मनोरेकतया क्वचिदीश्वरधर्मेण क्वचिच्च जीवधर्मेण ध्यानमुच्यते। आत्मस्वरूपमुक्त्वा तस्य ध्यान प्रकारः या० स्मृतौ उक्तः यथा। "अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम्। ध्येय आत्मा स्थितोयोऽसौ हृदये दीपवत् प्रभुः" "आत्मव्यतिरिक्तविषयेभ्यो मनोबुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्यात्मैकविषयाणि कृत्वात्मा ध्येयः योऽसौ प्रभुर्निर्वातस्थप्रदीपवद्देदीप्यमानो निष्प्रकम्पोहृदि तिष्ठति एतदेव तस्य ध्येयत्वं यच्चित्तवृत्तेर्बहिर्विषयावभासतिरस्कारेणात्मप्रवणतानाम शरावसम्पुटनिरुद्धप्रभाप्रतानप्रसरस्येव प्रदीपस्यैकनिष्ठत्वम्" मिता०।

**आत्मन्** पु० अत–मनिण्। १स्वरूपे, २यत्ने, ३देहे, ४मनसि, ५बुद्धिस्थे निजे, ६बुद्धौ, ७अर्के, ८वह्नौ, ९वायौ, १०जीवे, ११ब्रह्मणि च। "आत्मानं चेद्विजानीयदहमस्मीति पुरुष इति श्रुत्युक्तेः अहंप्रत्ययविषयत्वमात्मनः। अहं प्रत्ययविषयत्वे च बहुशःवादिविप्रतिपत्तयः शा० भाष्ये दर्शिताः। "देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताजना लौकायतिकाश्च प्रतिपन्नाः। इन्द्रियाण्येव चेतनान्यात्मेत्यपरे। मनइत्यन्ये। विज्ञानमात्रं क्षणिकमित्येके। शून्यमित्यपरे। अस्ति देहादिव्यतिरिक्तः संसारी कर्त्ता भोक्तेत्यपरे। भोक्तैव केवलं न कर्त्तेत्येके। अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित्। आत्मा स भोक्तुरित्यपरे। एवं हि बहवोविप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्तः"। विवृतञ्चैतत् विप्रतिपत्तिकारणसामान्यधर्म्मप्रदर्शनपुरःसरं विवरणोपन्यासे माधवाचार्य्येण "यथा रज्जुद्रव्यस्य दण्डसर्पधारादावनुस्यूतरूपेण प्रतीयमानत्वमेव सामान्यम् तथाऽऽत्मनः शरीरेन्द्रियमनोबुद्धिशून्यकर्त्तृभोक्तृसर्वज्ञब्रह्माख्यपदार्थेषु विप्रतिपत्तिस्कन्धेषु अनुस्यूतत्वेन प्रतीयमानत्वमेव सामान्यं भविष्यति प्रत्यक्षसिद्धेऽपि शरीराद्यर्थे प्रयुज्यमानस्यात्मवाचिनोऽहंशब्दस्य गोशब्दवदर्थविप्रतिपत्तिरुपपद्यते। गोशब्दस्य हि तत्तल्लक्षसिद्धव्यक्त्याकृतिजातिक्रियागुणाद्यर्थेषु प्रयुज्यमानस्य जातिरर्थत्वेन वैदिकैः प्रतिपन्ना, व्यक्तिः सांख्यादिभिः, उभयं वैयाकरणैः, स्वावयवसंस्थानाख्याकृतिरार्हतादिभिः। त्रितयमपि नैयायिकाद्यैः। अथ गोशब्दप्रयोगे जात्यादीनामन्वयव्यतिरेकनियमात्तदर्थत्वशङ्का। तर्ह्यहंशब्दप्रयोगेऽपि शरीरादीनामन्वयव्यतिरेकनियमात्तदर्थशङ्कास्तु। तत्र विचारविरहितं प्रत्यक्षमेव प्रमाणमाश्रित्य चेतयमानोऽहमात्मेति प्राकृताः शास्त्रसंस्कारवर्ज्जिता जनाः प्रतिपन्नाः। तथा भूतचतुष्टयमात्रतत्त्ववादिनो लौकायतिकाश्च, मनुष्योऽहं जानामीति शरीरस्याहंप्रत्ययालम्बनत्वेन ज्ञानाश्रयत्वेन चावगम्यमानत्वात्तदेवात्मेति मन्यन्ते। अन्ये पुनरेवमाहुः सत्यपि शरीरे चक्षुरादिभिर्विना रूपादिज्ञानाभावादिन्द्रियाण्येव चेतनानि। न चेन्द्रियाणां करणतया ज्ञानान्वयव्यतिरेकयोरन्यथासिद्धिः। करणत्वकल्पनादुपादानत्वकल्पनस्याभ्यर्हितत्वात्। अतः अन्धोऽहं काणोऽहं मूकोऽहमित्यहंप्रत्ययालम्बनानि चेतनानीन्द्रियाणि प्रत्येकमात्मत्वेनाभ्युपेयानि शरीरे त्वहंप्रत्ययालम्बनत्वं चेतनत्वञ्चात्मभूतेन्द्रियाश्रयत्वादन्यथासिद्धम्। नन्वेकस्मिन् शरीरे बहूनामिन्द्रियाणां चेतनत्वे यएवाहं पूर्वं रूपमद्राक्षं स एवेदानीं शब्दं शृणोमीति प्रत्यभिज्ञा न स्यात्।